# श्रीचैतन्योपनिषद्

March 28, 2004

[The text is based on the 1886 (Caitanyābda 400) edition published in Calcutta with the Sanskrit commentary of Kedaranath Datta and Bengali translation of Madhusudana Das. It was found at the British Library with shelfmark 14010.b.7.]

अथ पिप्पलादः समित्पानिर्भगवन्तं ब्रह्माणमुपसन्नः भगवन् मे शुभं किमत्र वक्ष्यसीति॥ १॥

स होवाच। भूय एव तपसा ब्रह्मचर्येण शश्वत् रम स्वमनो वसेति॥ २॥

स तथा भूत्वा भूय एनमुपसद्याह भगवन् कलौ पापाच्छन्नप्रजाः कथं मुच्येरन्निति॥ ३॥

को वा देवता को वा मन्त्रो ब्रुहीति॥ ४॥

स होवाच। रहस्यं ते वदिष्यामि जाह्नवीतीरे नवद्वीपे गोलोकाख्ये धाम्नि गोविन्दो द्विभुजो गौरः सर्वात्मा महापुरुषो महात्मा महायोगी त्रिगुणातीतः सत्त्वरूपो भक्तिं लोके काश्यतीति। तदेते श्लोकाः भवन्ति॥ ५॥

एको देवो सर्वरूपी महात्मा गौररक्तश्यामलश्वेतरूपः चैतन्यात्मा स वै चैतन्यशक्तिर्भक्ताकारो भक्तिदो भक्तिवेद्यः॥ ६॥

नमो वेदान्तवेद्याय कृष्णाय परमातने।
सर्वचैतन्यरूपाय चैतन्याय नमो नमः॥ ७॥

वेदान्तवेद्यं पुरुषं पुराणं चैतन्यात्मानं विश्वयोनिं महान्तं। तमेव विदित्वातिम्मृत्युमेति नान्यः पन्था विद्यतेऽयनाय॥ ८॥

स्वनाममूलमन्त्रेण सर्वं ह्लादयति विभुः॥ ९॥

द्वे शक्ती परमेतस्य ह्लादिनी सम्विदेव चेति॥ १०॥

स एव मूलमन्त्रं जपति हरिरिति कृष्ण इति राम इति॥ ११॥

हरति हृदयग्रन्थिं वासनारूपमिति हरिः। कृषि स्मरणे तच्च ण तदुभयमेलनं कृष्ण इति। रमति सर्वमिति रामः आनन्दरूपः। अत्र श्लोको भवति॥ १२॥

मन्त्रगुह्यः परमो भक्तिवेद्यः॥ १३॥

नामान्यष्टावष्ट च शोभनानि तानि नित्यं ये जपन्ति धीरास्ते वै मायामतितरन्ति नान्यः। परमं मन्त्रं परमरहस्यं नित्यमावर्तयति॥ १४॥

चैतन्य एव सङ्कर्षणो वासुदेवः पर्मेष्ठी
रुद्रः शक्रो बृहस्पतिः सर्वदेवा सर्वाणि
भूतानि स्थावराणि चराणि च यत् किञ्चित्
सदसत् कारणं सर्वं। तदत्र श्लोकः॥ १५॥

यत्किञ्चिदसद्भुङ्क्ते क्षरं तत् कार्यमुच्यते॥ १६॥

सत्कारणं परं जीवस्तदक्षरमितीरितं११ १७॥

क्षराक्षराभ्यां परमः स एव पुरुषोत्तमः।
चैतन्याख्यं परं तत्त्वं सर्वकारणकारणम्॥ १८॥

य एनं रसयति भजति ध्यायति स पाप्मानं तरति स पुतो भवति स तत्त्वं जानाति स तरति शोकं। गतिस्तस्यास्ते नान्यस्येति॥ १९॥

ॐ हरिः शान्तिः